# Nrisimha Kavacham from Brahmasamhita

# નૃસિંહકવચં બ્રહ્મસંહિતાયામ્

## Document Information

Text title : nRRisiMhakavacham brahmasaMhitAyAm

File name : nRRisiMhakavacham.itx

Category : kavacha, vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Transliterated by : Dinesh Agarwal

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, PSA Easwaran

Description-comments : Brahmasamhita

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# નૃસિંહકવચં બ્રહ્મસંહિતાયામ્

નારદ ઉવાચ ।
ઇન્દ્રાદિદેવ વૃન્દેશ તાતેશ્વર જગત્પતે ।
મહાવિષ્ણોર્નૃસિંહસ્ય કવચં બ્રૂહિ મે પ્રભો
યસ્ય પ્રપઠનાદ્ વિદ્વાન્ ત્રૈલોક્યવિજયી ભવેત્ ॥ ૧॥

બ્રહ્મોવાચ ।
શ ृણુ નારદ વક્ષ્યામિ પુત્રશ્રેષ્ઠ તપોધન(તપોધન) ।
કવચં નરસિંહસ્ય ત્રૈલોક્યવિજયાભિધમ્ ॥ ૨॥

યસ્ય પ્રપઠનાદ્ વાગ્મી ત્રૈલોક્યવિજયી ભવેત્ ।
સ્રષ્ટાઽહં જગતાં વત્સ પઠનાદ્ધારણાદ્ યતઃ ॥ ૩॥

લક્ષ્મીર્જગત્ત્રયમ્ પાતિ સંહર્તા ચ મહેશ્વરઃ ।
પઠનાદ્ધારણાદ્દેવા બભુવુશ્ચ દિગીશ્વરાઃ ॥ ૪॥
બ્રહ્મ મન્ત્રમયં વક્ષ્યે ભૂતાદિવિનિવારકમ્ ।
યસ્ય પ્રસાદાદ્દુર્વાસાસ્ત્રૈલોક્યવિજયી મુનિઃ ।
પઠનાદ્ ધારણાદ્ યસ્ય શાસ્તા ચ ક્રોધભૈરવઃ ॥ ૫॥

ત્રૈલોક્યવિજયસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ।
ઋષિશ્છન્દશ્ચ ગાયત્રી નૃસિંહ દેવતા વિભુઃ ।
ચતુર્વર્ગે ચ શાન્તૌ ચ વિનિયોગઃ પ્રકીર્ત્તિતઃ ॥ ૬॥

ક્ષ્રૌં બિજં મે શિરઃ પાતુ ચન્દ્રવર્ણો મહામનુઃ ।
ઉગ્રવીરં મહાવિષ્ણું જ્વલન્તઃ સર્વતોમુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યોર્મૃત્યું નમામ્યહમ્ ॥ ૭॥

દ્વાત્રિંશાદક્ષરો મન્ત્રઃ મન્ત્રરાજઃ સુરદ્રુમઃ ।
કણ્ઠં પાતુ ધ્રુવમ્ ક્ષ્રૌં હૃદ્ભગવતે ચક્ષુષી મમ ॥ ૮॥

નરસિંહાય ચ જ્વાલામાલિને પાતુ મસ્તકમ્ ।

દીપ્તદંષ્ટ્રાય ચ તથાગ્નિનેત્રાય ચ નાસિકામ્ ॥ ૯॥

સર્વરક્ષોઘ્નાય દેવાય સર્વભૂતવિનાશાય ચ ।
સર્વજ્વરવિનાશાય દહ દહ પચ દ્વયમ્ ॥ ૧૦॥

રક્ષ રક્ષ સર્વમન્ત્રમ્ સ્વાહા પાતુ મુખં મમ ।
તારાદિ રામચન્દ્રાય નમઃ પાયાદ્ગુહ્યં મમ ॥ ૧૧॥
ક્લીં પાયાત્પાણિયુગ્મંશ્ચ તક્રમ્ નમઃ પદમ્ તતઃ ।
નરાયણાઽપ્રસવમ્ ચ આં હ્રીં ક્રૌં ક્ષ્રૌં ચં હું ફટ્ ॥ ૧૨॥

ષડક્ષરઃ કટિં પાતુ ૐ નમો ભગવતે પદમ્ ।
વાસુદેવાય ચ પૃષ્ઠં ક્લીં કૃષ્ણાય ઉરુદ્વયમ્ ॥ ૧૩॥

ક્લીં કૃષ્ણાય સદા પાતુ જાનુની ચ મનૂત્તમઃ ।
ક્લીં ક્લીં ક્લીં શ્યામલાઙ્ગાય નમઃ પાયાત્પદદ્વયમ્ ॥ ૧૪॥

ક્ષ્રૌં નરસિંહાય ક્ષ્રૌંશ્ચ સર્વાઙ્ગં મે સદાઽવતુ ॥ ૧૫॥

One line verse for demarkation with iti te kathitam
ઇતિ તે કથિતં વત્સ સર્વમન્ત્રૌઘ વિગ્રહમ્ ।
તવસ્નેહાન્મયા ખ્યાતં પ્રવક્તવ્યં ન કસ્યચિત્ ॥ ૧૬॥
ગુરુપૂજા વિધાયાથ ગૃહણીયાત્ કવચં તતઃ ।
સર્વપુણ્યયુતો ભૂત્વા સર્વસિદ્ધિયુતો ભવેત્ ॥ ૧૭॥

શતમષ્ટોત્તરં ચૈવ પુરશ્ચર્યાવિધિ સ્મૃતઃ ।
હવનાદીન્ દશાંશેન કૃત્વા સાધકસત્તમઃ ॥ ૧૮॥

તતસ્તુ સિધ્દ કવચઃ પુણ્યાત્મા મદનોપમઃ ।
સ્પર્દ્ધામુદ્ધય ભવને લક્ષ્મીર્વાણી વસેત્ તતઃ ॥ ૧૯॥

પુષ્પાઞ્જલ્યાષ્ટકમ્ દત્વામૂલે નૈવ પઠેત્ સકૃત્ ।
અપિ વર્ષસહસ્રાણામ્ પૂજાયાઃ ફલમાપ્નુયાત્ ॥ ૨૦॥

ભૂર્જે વિલિખ્ય ગુટિકામ્ સ્વર્ણસ્થામ્ ધારયેત્ યદિ ।
કણ્ઠે વા દક્ષિણે બાહૌ નરસિંહો ભવેત્ સ્વયમ્ ॥ ૨૧॥

યોષિદ્વામભુજે ચૈવ પુરુષો દક્ષિણે કરે ।
વિભૃયાત્ કવચં પુણ્યમ્ સર્વસિદ્ધિયુતો ભવેત્ ॥ ૨૨॥

કાકબન્ધ્યા ચ યા નારી મૃતવત્સા ચ યા ભવેત્ ।

જન્મબન્ધ્યા નષ્ટપુત્રા બહુપુત્રવતી ભવેત્ ॥ ૨૩॥

કવચસ્ય પ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ।
ત્રૈલોક્ય ક્ષોભયત્યેવ ત્રૈલોક્યં વિજયી ભવેત્ ॥ ૨૪॥

ભૂતપ્રેતપિશાચાશ્ચ રાક્ષસા દાનવશ્ચ યે ।
તં દૃષ્ટ્વા પ્રપલાયન્તે દેશાદ્દેશાન્તરં ધ્રુવમ્ ॥ ૨૫॥

યસ્મિન્ ગેહે ચ કવચં ગ્રામે વા યદિ તિષ્ઠતિ ।
તં દેશન્તુ પરિત્યજ પ્રયાન્તિ ચાતિ દૂરતઃ ॥ ૨૬॥

॥ ઇતિશ્રીબ્રહ્મસંહિતાયાં સપ્તદશાધ્યાયે ત્રૈલોક્યવિજયં નામ
શ્રીશ્રીનૃસિંહકવચં સમ્પૂર્ણમ્ ॥

Dinesh Agarwal dinesh.garghouse at gmail.com
PSA Easwaran

*Nrisimha Kavacham from Brahmasamhita*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*